तिरुमलतिरुपतिदेवस्थानानि

# सप्तगिरिः

आध्यात्मिकसचित्रमासपत्रिका

SAPTHAGIRI (SANSKRIT)
SPIRITUAL ILLUSTRATED MONTHLY
Volume:12 Issue: 06
September 2025, Price Rs.20/-
No. of pages-24

September 2025
Rs.20/-



## तिरुमल

## श्रीवेङ्कटेश्वरस्वामिनः वार्षिकब्रह्मोत्सवेषु वाहनानि

24.09.2025 तः 02.10.2025 पर्यन्तम्

आन्ध्रप्रदेशराज्यमाननीय मुख्यमन्त्री श्री यन् चन्द्रबाबुनायुडु महोदयाः 19.07.2025 तिथौ तिरुपतिस्थ कामाक्षीदेवी सहितकपिलेश्वरस्वामिमन्दिरे कपिलेश्वरस्वामिनः पवित्र दर्शनभाग्यं प्रापुः। अस्मिन् सन्दर्भे अर्चकगणैः मुख्यमन्त्रिवर्याय आशीर्वचनं प्रदत्तम्। स्वर्णान्ध्रस्वाच्छान्ध्र कार्यक्रमान्तर्भागत्वेन मुख्यमन्त्रिवर्यैः परिसरप्रान्तः शुचीकृतः शुभ्रकृतश्च।















# गीतामृतम्



श्रीभगवानुवाच -

विषयाः विनिवर्तन्ते निराहारस्य देहिनः।
रसवर्जं रसोऽप्यस्य परं दृष्ट्वा निवर्तते।।

यततो ह्यपि कौन्तेय! पुरुषस्य विपश्चितः।
इन्द्रियाणि प्रमाथीनि हरन्ति प्रसभंमनः।।

(भगवद्गीता २.५९-६०)

५९. भावः - हे अर्जुन! आहारेणविना तपः आचरतः पुरुषस्य विषयाः निवृत्ताः भवन्ति। परन्तु विषयवासनाः न नश्यन्ति। दैवरसप्राप्तौ विषयरसः नश्यति।अतः परमात्मदर्शनादेव विषयवासनाः सम्पूर्णतया विनश्यन्ति।

विशेषांशः - बाह्यतपः पर्याप्तं न भवति। आत्मज्ञानाग्नौ अन्तः करणवासनावृत्तिरूपेन्धनानि दाह्यनि। शरीरेन्द्रिय पुष्टै पुनः विषयाभिलाषः अविर्भवति। ज्ञानाग्नौदग्धहृदयेसतिपुनर्जन्म नस्यात्।

६०. भावः - इन्द्रियणि विषयेभ्यः दूरीकर्तुं प्रयत्नं कुर्वतः विदुषः पुरुषस्य मनः अपि प्रमादकरेन्द्रियाणि बलात् हरन्ति। पण्डितस्य साधकस्य मनः अपि विषयाः संक्षोभयन्ति चेत् पाण्डित्यानुष्ठानरहितस्य पुरुषस्य विषयः वक्तव्य एव नास्ति। सुलभतया सः इन्द्रिथाकृष्टो भवति।

# सङ्कीर्तनम्



नवनीतचोर नमो नमो
नवमहिमार्णव नमो नमो
हरिनारायण, केशवाच्युत श्रीकृष्ण
नरसिंहवामन नमो नमो
मुरहर, पद्मनाभ मुकुन्द गोविन्द
नरनारायणरूप, नमो नमो
निगमगोचर विष्णुनीरजाक्ष, वासुदेव
नगधर, नन्दगोप नमो नमो
त्रिगुणातीत देव त्रिविक्रम, द्वारक
नगराधिनायक नमो नमो
वैकुण्ठ,रुक्मिणीवल्लभ चक्रधर
नाकेशवन्दित नमो नमो
श्रीकरगुणनिधि, श्री वेङ्कटेश्वर
नाकजननुत नमो नमो

(अन्नमाचार्य आध्यात्मक सङ्कीर्तनम् - ३१)

अकाले दुर्लभो मृत्युः स्त्रियो वा पुरुषस्य वा।

# सहस्रनेत्राण्यपि अपर्याप्तान्येव

वेङ्कटाद्रिसमं स्थानं ब्रह्माण्डे नास्ति किञ्चन।
वेङ्कटेशसमो देवोनभूतो न भविष्यति।।

दिव्यशक्तिमन्तः देवाः। तेषां खेचराः, आकाशसञ्चारिणः इति नाम वर्तते वाहनाभावेऽपि सङ्कल्पमात्रेणैव सर्वजगत्सञ्चरणदिव्यशक्तयः तेषां स्वाधीनाः। सर्वेषां देवानां वाहनानि सन्ति। विग्रहाराधन-उत्सव वाहनसेवा-दयः सर्वे संसारसागरादस्मदुद्धरणायैव। वहतीति वाहनम्। देवानां वाहनानि तेषां शक्ति प्रतीकानि। अतः वाहनविशेषाः तात्त्विकदृष्ट्या ग्राह्याः।

विष्णोः गरुत्मान् वाहनम्। सः वेदमयः। अत एव विष्णुवाहनशक्तिं प्राप्तः। विष्णोः वेदमयशक्तिरेव वाहनगरुत्मद्रूपं प्राप्ता। शक्तेः रुपान्तरमेव वाहनम्। वाहनमेव तद्देवध्वजपटत्वेन वर्तते। शिवस्य वाहनं वृषभः। वृषभोनाम धर्मः। अत एव धर्मः एव शिववाहनम्। एवं दुर्गादेव्याः सिंहः वाहनम्। सिंहः पराक्रमसङ्केतः। एवं हनुमद्वाहनं दास्यभक्तेः विश्वासाय च सङ्केतः। गजः शुभदर्शनार्थं, महाबलस्य च सङ्केतः। आदिशेषः भारवाहनशक्तेः सङ्केतः।

उत्सवेषु तत्तद्वाहनस्थोत्सवमूर्तिदर्शनात् वाहनानि यासां यासां शक्तीनां सङ्केतानि भवन्तीति ज्ञात्वा तदधिष्ठानदेवं भगवन्तं हृदये स्थिरीकरणादेव स्वयमपि वाहनत्वेन परिणताः। भगवद्वाहक - शक्तिसामर्थ्यानि अनुग्रहञ्च प्राप्स्यन्ति। चक्रवर्तिनः पादाभ्यां गमनशक्तिमन्तोऽपि वाहनमधिरुह्यैव गच्छन्ति। एतत् तेषां चक्रवर्तित्वलक्षाणम्। गौरवप्रदञ्च। देवानां वाहनान्यपि दिव्यशक्तिविशिष्टानि आकाशगमनसमर्थाणि।

श्रीवेङ्कटेश्वरब्रह्मोत्सवेषु अनेकवाहनसेवाः वर्तन्ते। वर्षे वर्षे एते उत्सवाः अत्यन्तरमणीतया वैभवोपेततया भक्तेभ्यः नयनपर्ववत् निर्वाह्यन्ते। एतदानन्दप्रदोत्सवदर्शनाय सहस्रनेत्राणि न पर्याप्तानि भवन्ति। ब्रह्मोत्सवेषु तिरुमलक्षेत्रं सर्वाङ्गसुन्दररूपं प्राप्नोति। मनुष्येभ्यः देवेभ्यः स्वागतार्थं ति.ति.देवस्थानं महासंरम्भेण समायत्तं भवति। गोविन्दनामगानं, विद्युद्दीपालङ्कारः, तोरणसमाहारः, भक्तजनकोलाहलः, एतैः तिरुमलक्षेत्रं अपरवैकुण्ठमिव द्योत्यते। सर्वदेवताभिः समधिकोत्साहेन भागस्वीकरणब्रह्मोत्सवानां कृते सर्वेषां स्वागताह्वानमिदमेव। आगच्छन्तु प्रस्थानं कुर्वन्तु। मनश्शरीरतन्मयत्वप्रापकभक्ति भावेन आबालगोपालं आगत्य गोविन्दाय नमस्करिष्यामः।

नयनफलं वेङ्कटनारायण दर्शनम्
पादफलं सप्तगिरिगमनम्
वाक्फलं वासुदेवस्मरणम्।।

श्रीवेङ्कटाचलाधीशं श्रियाध्यासित वक्षसं।
श्रितचेतसमन्दारं श्रीनिवाहमहं भजे।।

# सेप्टम्बर् - २०२५

सम्पुटिः-१२ सञ्चिका-०६

स्वस्तिश्री चान्द्रमानश्रीविश्वासुनामसंवत्सर भाद्रपदशुद्धनवमीसोमवारादारभ्य - आश्वयुजशुद्धाष्टमी - मङ्गलवारपर्यन्तम् - २०२५

दुर्गाभवानीदेवी चरितम् 06
- डा पि.माधवी

वेदपुराणेषु वेङ्कटेश्वरस्य वेङ्कटाचलस्य महत्त्वम् 08
- डा के.कोटेश्वरय्य

तिरुमलक्षेत्रपरिसरदर्शनीय स्थलानि 11

सरस्वतीदेवी महत्त्वम् 15
- आचार्य जि.पद्मनाभम्

अनन्तपद्मनाभस्वामिनः व्रतकथाः 17
- डा.वि.माधवरेड्डि

अतिलोकसुन्दरीषणास्पर्धा आत्मविनाशायैवहि केवलम् 19
- डा.यस्.गुणवती

आदौ गुरुः शिलावत्कठिनोऽपि अन्ते घृतवत् द्रवीभवद्दयासमुद्रः (चित्रकथा) 20
- डा.के.सूर्यनारायणरेड्डि

बालविनोदिनी 22

मुखचित्रम् - विविध वाहनेषु आरुढः श्रीमल्लयप्पस्वामी।
अन्तिमपुटचित्रम्:- उमावाणीलक्ष्मीदेव्यः।

## सङ्केतः

प्रधानसम्पादकः,
सप्तगिरिः, ति.ति.देवस्थानानि
तिरुपतिः - ५१७ ५०७.

दूरभाषा - ०८७७ - २२६४५४३, २२६४३५९
सम्पादकः,
०८७७ - २२६४३६०

सूचनानाम्, आक्षेपाणां च कृते सम्पर्क कुर्वन्तु -
chiefeditortpt@gmail.com

एका पत्रिका : रू.२०/-
वार्षिकग्राहकत्वम् रू.२४०/-
आजीविक ग्राहकत्वम् रू.२४००/-

*वेङ्कटाद्रिसमं स्थानं*
*ब्रह्माण्डे नास्ति किञ्चन ।*
*वेङ्कटेशसमो देवो*
*न भूतो न भविष्यति ॥*

तिरुमलतिरुपतिदेवस्थानम्

# सप्तगिरिः

आध्यात्मिकसचित्रमासपत्रिका

गौरवसम्पादकः:-
श्री जे.श्यामला राव्, I.A.S.,
कार्यनिर्वहणाधिकारी, ति.ति.देवस्थानानि।

प्रकाशकः -

सम्पादकः, प्रधानसम्पादकः( F.A.C.)
डा॥ वि.जि.चोक्कलिङ्गम्, M.A., Ph.D.,

मुद्रापकः -
श्री आर्.वी.विजयकुमार् B.A.,B.Ed.,
उपकार्यनिर्वहणाधिकारी
मुद्रणालय - पुस्तकविक्रयकेन्द्रम्
ति.ति.देवस्थानम्, तिरुपति

मुख्यछायाचित्रग्राहकः -
श्री पि.एन्.शेखरः,
छायाचित्रग्राहकः, ति.ति.दे.
श्री बि.वेङ्कटरमणः, सहायक-छायाचित्रग्राहकः, ति.ति.दे.



सूचना
मुद्रितलेखानां विचाराः लेखकानामेव।
एतद्विषये अस्माकं दायित्वं नास्ति।
– *प्रधानसम्पादकः*

अनतिक्रमणीयानि श्रेयांसि, अनतिक्रमनीयो हि विघ्नः।



# दुर्गाभवानीदेवी चरितम्

- डा.पि.माधवी, चरवाणी - ८५१९८०४७८४

**खड्गं चक्रगदेषुचाप परिघान् शूलं भुशुण्डीं शिरः।**
**शंखं सन्दधतीं करैस्त्रिनयनां सर्वाङ्गभूषावृतां।**
**यां हन्तुं मधुकैटभौ जलजभूस्तुष्टाव सुप्ते हरौ।**
**नीलाश्मद्युतिमास्यपाददशकां सेवे महाकालिकाम्॥**

पूर्वं स्वारोचिषमन्वन्तरकाले सुरथः इति महाराजः प्रजापालनतत्परः नित्यसत्यव्रतः धनुर्विद्यापारीणः राज्यं पालयति स्म। तस्य राज्यान्तस्थपर्वते कोला विध्वंसनामानः म्लेच्छजातीयाः सुरथे, राज्ञि असूयाग्रस्ताः महासैन्येन युद्धाय आगताः। मायोपायैः सुरथामात्यान् स्वपक्षान् चक्रुः। राजा मन्त्रिभिः शत्रुपक्षगमनात् युद्धेपराजितः। गत्यन्तराभावात् अश्वमधिरुह्य दुर्गमारण्यं प्रविवेश। तत्र योजनत्रये सुमेधमहर्ष्याश्रमं प्राप्य आत्मरक्षणार्थं प्रार्थयामास। सुमेधमहर्षिः राज्ञः अवस्थां श्रुत्वा स्वाश्रमे प्रशान्तजीवनाय अनुमतिं ददौ। तदा कश्चित् धनिकः वैश्यः आगत्य **आत्मवृत्तान्तमेवमुवाच - :** अहं वैश्यकुलीनः। मद्भार्यापुत्राः दुष्टबन्धुप्रेरिताः मां गृहात् निष्कासितं चक्रुः। अहिंसावादी अहं दुःखनिमग्नः परिभ्रमन्निमामटवीं प्राप्तः त्वां दृष्टोऽस्मीत्यवोचत्। राज्ञः वैश्यस्य च दुरवस्थायाः एकत्वात् उभौ सखायौ जातौ। ततः तौ स्वदुःखनिवारणार्थं सुमेधमुनिमुपायं पप्रच्छतुः। सुमेधमुनिः ''युवां महामायामोहसंसारचक्रे पतितौ। ब्रह्मविष्णुमहेश्वराः, इन्द्राग्निवरुणादिदेवाः गन्धर्वनागराक्षस मनुष्यमृगपक्षिणः महामायाधीनाः। चराचरजगत् मायसृष्टि पतितमेव इति तावुवाच। तदा तौ सुरथसमाधिनामकौ तौ मायावृत्तान्तं सर्वं निवेदयस्वेति मुनिं पुनः पप्रच्छतुः। तदा महर्षिः सुमेधः कथामवेमुवाच। पुरा सत्ययुगे महाविष्णुः ब्रह्मविद्याप्राप्तये दशवर्षसहस्रेभ्यः घोरं तपः आचरति स्म। एवं मोहपाशनिवृत्त्यर्थं ब्रह्मापि दिव्यप्रदेशे उग्रं तपः आचरन् बहुवर्षसहस्रं ध्याने आसीत्। उभवापि कदाचित् तपः प्रदेशात् अन्यप्रदेशं गन्तुं निश्चितौ गच्छन्तौ अप्रयत्नादुभौ मिलितौ। परस्परकुशलप्रश्नेषु, ब्रह्मा अहं सप्तलोकसृष्टिकर्ता इत्युवाच। विष्णुरपि अहमेव जगत्कर्ता, त्वं मूढः रजोगुणविशिष्टः। अहं सत्वगुणविशिष्टः सनातनः वासुदेवः। पुरा त्वं मधुकैटभराक्षस बाधितः प्राणरक्षणार्थं मच्छरणं प्राप्तः। अहं त्वदर्थं तौ हत्वा त्वां रक्षितोऽस्मि। विस्मृतोऽसि पूर्ववृत्तम्। अहं सृष्टिकर्तेति वदसि। सकलप्रपञ्चः, मदधिकः कोऽपि नास्ति त्वद्गर्वमुपसंहर इति



अनार्यः परदारव्यवहारः, अनिर्वर्णनीयम् परकलत्रम्।

वदन्नासीत्। उभयोर्मध्ये वादः महाक्रोधात् तारापथंप्राप्तः। तदा उभयोर्मध्ये आकाशपरिमाणमहालिङ्गमेकमुद्भूय विश्वव्याप्तमासीत्। तद्दृष्ट्वा उभावाश्चर्यचकितावास्ताम्। तदा आकाशवाणी ''एतन्महालिङ्गस्य आद्यन्तौ उभयोर्मध्ये यः, गत्वा दृष्ट्वा आगमिष्यति स एव महानिति अहं तव समर्थ्यपरीक्षां करोमीत्यवोचत्। तदा ब्रह्मा उपरिभागदर्शनार्थं, विष्णुः अधोभागान्तदर्शनार्थं प्रतस्थौ। विष्णुः पाताललोकान्तं गतोऽपि महालिङ्गान्तप्रदेशमज्ञात्वा प्रतिनिवृत्तः। ब्रह्मा महालिङ्गोपरिभागान्तदर्शनार्थं गच्छन् केतकीपुष्पं मार्गे दृष्ट्वा तदानीय अहं महालिङ्गन्तिमोर्ध्वप्रदेशं दृष्टोऽस्मि इदं केतकीपुष्पमेव साक्ष्यमिति केतकीपुष्पं साक्ष्यं वक्तुं प्रेरयामास। तदा तत्पुष्पं ''भक्तेः अहं शिवशिरसि समर्पितोऽस्मि। अयं ब्रह्मा स्वशिरस्थं मामानीय आगतः इत्यवोचत्। विष्णुः त्वद्वचनमसत्यम् परमेश्वरेणैव सत्ये उक्ते विश्वसिष्यामीत्यवोचत्। तदा परमेश्वरः प्रत्यक्षीभूय केतकीपुष्पमुद्दिश्य त्वमसत्यं वदसि। इतः परं त्वां परित्यजामि इत्यवोचत्। तदा ब्रह्मा विष्णुपादपतितः क्षमामयाचत। तस्मात्कालादेव केतकीपुष्पं शिवपूजायां निषिद्धम्।

हे सुरथ महाराज! महामायाज्ञानिनः अपि मायापतितान् करोति। विष्णुमूर्तिः देवताश्रेयसे राक्षसान् मायोपायैः वञ्चयन् तन्नाशार्थं बहुविधजन्मानि गृह्णाति। स्वसुखं परित्यज्य राक्षसैः, सदा युद्धं करोति। माधवः एव मायाप्रभाववशीभूतः भवति। महामाया पराप्रकृतिः य, कमपि मोहयति। ज्ञानप्रदा बन्ध मोक्षप्रदा च। सुमेधात् एतच्छ्रुत्वा सुरथः राजा, मायास्वरूप जन्मस्थानं, मायान्तं च ब्रूहीति सुमेधं मुनिमपृच्छत्। तदा **सुमेधमुनिरेवं विवृणोति -:** महामाया अनादिः। जननमरणरहिता नित्यसत्यपराप्रकृतिः। सर्वभूतेषु शक्तिरूपेण देवकार्यसिद्ध्यर्थमाविर्भूता। सर्वस्वतन्त्रा विश्वव्याप्ता जगन्नाटके परमपुरुषं रञ्जयन्ती अन्ते महाप्रलये निमज्जयति। हरिहरब्रह्मादयः निमित्तमात्राः केवलम्।

''कल्पिताः सर्वकार्येषु ........

एतत्ते सर्वमाख्यातं

देवीमाहात्म्यमुत्तमम्

(दे-भा-५ स्कन्धः, अध्यायः ३३-६)

त्रिमूर्तयः अपि स्वमहाशक्तिप्रेवशात् स्वसृष्टि रक्षणलयकार्याणि कुर्वन्ति। इयं माता ब्रह्मविष्णुमहेश्वरेभ्यः सरस्वतीलक्ष्मीपार्वतीः सृष्ट्वा ददौ। अत एव ते, प्रीत्या, नित्यं सा सृष्टिस्थितिलयकारिणी, वयं निमित्तमात्राः इति वदन्ति। तदा महामाया प्रभावं श्रुत्वा पुरनपि तन्माहत्म्यं श्रावयेति समाधिसुरथौ सुमेधं प्रार्थयामासतुः। तदा सुमेधः मधुकैटभराक्षसौ विष्णुमूर्तिं निमित्तीकृत्य (मधुकैटभौ) दुर्गाभवानी हतवतीति एवं प्रोवाच -

**मधुकैटभयोः वधकथा -:** प्राचीनसाहित्ये दुर्गासम्बन्धबह्वः कथाः तस्याः महत्त्वप्रकाशकाः प्रतीकात्मकतया सत्यस्य भिन्नस्वरूपबोधकास्सन्ति। वामनपुराणमनुसृत्य कल्पान्ते भगवान् विष्णुः क्षीरसागरे शेषनागशय्यायां निद्रानिमग्नः आसीत्। तस्य कर्णमालिन्यात् मधुकैटभनामक - भयङ्कर राक्षसावुत्पन्नौ। तौ सर्वत्र निर्जनतां दृष्ट्वा विष्णुनाभिकमले सृष्टिनिर्माणालोचना निमग्नं ब्रह्माणं दृष्टवन्तौ। ततः तमाक्रम्य हन्तुं, प्रयतितवन्तौ। ब्रह्मा शरणार्थं योगनिद्रातः विष्णुं जागृतंकर्तुं महामायास्वरूपिणीं प्रार्थयामास। विष्णुः योगनिद्रोत्थितः मधुकैटभाभ्यां बहुवर्षपर्यन्तं युद्धं चकार। युद्धे तान् पराजितौ चकार। तदा पुनः ब्रह्मा देवीं स्वमायाप्रभावेण मधकैटभौ युद्धविरतौ मधुकटभौ कर्तुं प्राथयामास। तौ भगवन्तं विष्णुमुद्दिश्य तव वीरत्वं ज्ञात्वा आवांप्रसन्नौ। यं कमपि वरं वृणीष्वेति अपृच्छताम्। तदा विष्णुः मम हस्ते युवयोः मरणं भवतु इति वरमयाचत। वाग्दानमनुसृत्य विष्णुना स्वमरणमङ्गीकृतौ तौ जलहीनप्रदेशे एव आवयोः हत्या कर्तव्येत्यूचतः। विष्णुः स्वविशालजंघायां तौ सुदर्शनचक्रेण खण्डशः कृत्वा जघान। एवं ब्रह्मणः रक्षणार्थं देवीसाहाय्यादेव विष्णुः तौ हतौ चकार। एवं सा महामायाशक्तिरूपिणी दुर्गा दुष्टशिक्षणाय उपकृतवती। अनया कथया निद्रावस्थायां दुष्टशक्तयः उत्पद्यन्ते इति ताः सर्वकूटनीतीरपि प्रयुज्य विनाशीकरणीयाः इति अन्तरार्थः बोध्यते।



(अनुवर्तते)



# वेदपुराणेषु वेङ्कटेश्वरस्य वेङ्कटाचलस्य महत्त्वम्

- डा.के.कोटेश्वरय्य, चरवाणी - ९९८५१२३२६२

कलियुगप्रत्यक्षदैवस्य श्रीवेङ्कटेश्वरस्वामिनः वेङ्कटाचलक्षेत्र प्रस्तावनगाथा वराह - पद्म ब्रह्माण्ड स्कान्द आदित्य - ब्रह्म - भविष्योत्तरण गरुड मार्कण्डेय वामन - ब्रह्मोत्तर द्वादश पुराणेषु हरिवंशपुराणेच मनोहरतया अभिवर्णिता। श्रीवेदव्यास-प्रोक्त संस्कृतपुराणेषु श्रीवेङ्कटेश्वरस्वामिनः अवतारः पद्मावतीदेव्या परिणयः, स्वामिनः दिव्यलीलाचरित्रविशेषाः वेङ्कटाचलस्य तीर्थमहात्म्यमित्याद्यंशाः मनोहरतया वर्णिताः दृश्यन्ते।

**वेदाधारः -** प्रवःपान्तमन्धसोधियायते महेशूराय विष्णवे चार्चत ऋकसंहिता मण्डलम् १।

सूक्तम् - १५५, मन्त्रः - आरायिकाणे विकटेगिरिं गच्छसदान्वे शिरिविठस्य सत्त्वभिः तेभिष्ट्वा चातयामसि ऋक्संहिता मण्डलम् - १० स-१५५ मन्त्रश्च।

रथिःककुद्मान् विदधव्विनष्टं रयिमद्विधानम्।
तस्मै ककुत्रे विकटाय पित्रे स्वाहा,
श्रीवैखानसमन्त्रसंहिता प्रश्नः ७ अनुवाकमन्त्र - ३
अर्चावतारवत्भूयात् नराणां मांसचक्षुषाम्
वैकुण्ठादागतं दिव्यं विमानस्तुतिरेहितम्
विमानमात्रन्तु कलौकारयिष्यन्ति मानवाः
साक्षाद्भाषणमेकस्तु नास्ति तस्य तपोधनाः

परन्तु सर्वमप्यस्त्वेव निग्रहानुग्रहानपि अधिकं वरादानन्तु भविष्यतिकलौ युगे। कलियुगदेवः श्रीनिवासः कलियुगमानवमांसचक्षुषां आर्चामूर्तित्वेन दृष्टोऽपि सः परमपदश्रीमन्नारायण एव। तत्र वैकुण्ठे सनकसनन्दनादि महायोगिभिः सम्भाषणं कुर्वन्निव अत्र मानवानुद्दिश्य सम्भाषण मकुर्वाणोऽपि वरानुग्रहेतु तत्र अत्र च महादयासमुद्रः एव स्यात्। तिरुमलक्षेत्रं वराह क्षेत्रमिति पुराणानि वर्णयन्ति। श्रीनिवासवक्षःस्थले अधिवसितलक्ष्मीदेवी पुराणानि व्यूहलक्ष्मीत्यभिवर्णयन्ति। गगने स्वर्णकान्तिभिः विराज दानन्दनिलयविमानः, तत्र श्रीनिवासविर्भावः अद्भुत वर्णानाविष्कृताःदृश्यते।

१. वेङ्कटाचलमाहाम्त्यविषयाः वराहपुराणे प्रथमभागे श्वेतवराहकल्पवृत्तान्तकथनादारभ्य त्र्यधिकषष्ठिघट्टेषु वर्णिताः। ततः वराहपुराणद्वितीय भागे नारदस्य सुमेरु शिखरस्थ यज्ञवराहदर्शनादारभ्य चतुस्सप्तति घट्टेषु वर्णिताः

२.श्रीपद्मपुराणे मेरुशिखरात् शुकब्रह्मर्षे वेङ्कटाचलगमनमित्यारभ्य अष्टनवति घट्टेषु विषया वर्णिताः।

३. गरुडपुराणगतविषयाः - वसिष्ठं प्रति वेङ्कटाद्रिमाहाम्त्य श्रवणेच्छवत्याः अरुन्धतीदेव्याः प्रश्नादारभ्य सप्तघट्टेषु वर्णिताः।

४. हरिवंशान्तर्गत श्रीशेषधर्मे विषयाः नारदादीनां भगवत्सेवार्थं श्रीभीष्मकृत युधिष्ठिरप्रेरणपर्यन्तं घट्टत्रये विषयाः वर्णिताः।

५. ब्रह्माण्डपुराणे -भृगुनारदसंवादात्मक सूतोक्त श्रीवेङ्कटाचलमाहाम्त्यमित्यारभ्य अष्टपञ्चाशतघट्टेषु विषयाः वर्णिताः।

६. मार्कण्डेयपुराणे - तीर्थयात्रेच्छया पितृनिकटे मार्कण्डेय विज्ञप्तिः - इत्यारभ्य षड्विंशतिघट्टपर्यन्तं विषयाः वर्णिताः।

७. श्रीवामनपुराणे - प्रयागमाहात्म्यादारभ्य एकोनवति


अप्रियस्य च पथ्यस्य वक्ता श्रोता सुदुर्लभः।

घट्टपर्यन्तं विषयाः वर्णिताः।
ति.ति.देवस्थान प्रचुरित वेङ्कटाचल माहात्म्यद्वितीय भागे वर्णिताः विषयाः ब्रह्मपुराणे दुर्वाससं प्रति दिलीपकृतप्रश्नः इत्यारभ्य षट्चत्वारिशत्घट्टेषु विषयाः वर्णिताः।
८. ब्रह्मोत्तरखण्डे दशघट्टेषु विषयाः वर्णिताः।
९. स्कान्दपुराणे प्रथमभागे - काश्यपस्य स्वामिपुष्करिणी स्नानेन महापातकनाशः इत्यारभ्य चतुस्सप्ततिघट्टपर्यन्तं विषयाः वर्णिताः।
१०. स्कान्दपुराणे द्वितीयभागे - कटाहतीर्थादारभ्य नवसु घट्टेषु विषयाः वर्णिताः।
११. स्कान्दपुराणे तृतीय भागे - अर्जुन तीर्थयत्राक्रमः आरभ्य त्रिचत्वारिंशत् घट्टेषु विषयाः वर्णिताः।
१२. स्कान्दपुराणे चतुर्थभागे - पुत्रार्थमञ्जनाकृततपः प्रकारः - इत्यारभ्य घट्टत्रये विषयाः वर्णिताः।
१३. आदित्यपुराणे - शौनकादीन् प्रति सूतप्रोक्त श्रीनिवासवैभवम् - इत्यारभ्य षट्सु घट्टेषु विषयाः वर्णिताः।
१४. भविष्योत्तरपुराणे - जनकनृपानुभूत शोकातिरेकप्रचारः इत्यारभ्य (३०६) षडधिकत्रिंशत घट्टेषु विषयाः वर्णिताः। श्रीवेङ्कटेश्वरस्तोत्ररत्नकरग्रन्थे वेङ्कटेश्वरं ति.ति.देवस्थान प्रचुरित। वेङ्कटाचलमाहात्म्यमधिकृत्य महर्ष्यादिभिः स्तुतानि स्तोत्राणि विविधपुराणगतानि लभ्यन्ते।
१. हिरण्याक्षवधं प्रसन्नब्रह्मादिभिः वराह स्तुतिः, भूदेवीं कन्दुकवत् पीडयन्तं हिरण्याक्षं वराहमूर्त्या वधात् ब्रह्मादिभिः ‘‘जयदेव इत्यारभ्य पञ्चश्लोकेषु, श्रीमन्नारयणः वराहपुराणे ३३ अध्याये स्तुतः।
२. क्रीडाद्रौ तिरुमल क्षेत्रे स्वयम्भूमूर्तिरूपेण अर्चामूर्तिरूपेण प्रकाशमानं श्वेतवराहमूर्ति श्रीमन्नारायणं जय लक्ष्मीश... इत्यादिसप्तश्लोकेषु, ब्रह्मादयः वराहपुराण ३५ अध्याये स्तुतवन्तः।
श्रीवराहमन्त्राराधनविधिः - श्रीमन्नारायणः भूदेव्यै वराहमन्त्राराधनविधिमेवं बोधयामासः - श्रृणु देवि वरं गुह्यमित्यादिदश श्लोकेषु इति श्रीमन्नारायणबोधः वर्णितः। (व. पु - भूगोलोपाख्यानम् १-अध्यायः।)
३. वराहमन्त्रेण धर्मादीनां स्वाभीष्टसिद्धिवर्णनम्। वराहमन्त्रराजाराधनविधिना कथं कृतार्थाः भवन्तीति षट्सु श्लोकेषु व्यवरीत्। (व-पू-भूगोल-२अध्यायः।
४. सृष्ट्यादौ वराहकृतधरण्युद्धरणक्रमः भरद्वाजेन षड्विंशति श्लोकेषु वर्णितः (स्कन्द-३ भागः अध्यायः७)
५. मार्कण्डेयस्य स्वामितीर्थ स्नानपूर्वक श्री वराहसेवाप्राप्तिः ५ श्लोकेषु वर्णिता। म-४-२अ
६. भगवन्तमुद्दिश्य दशरथकृत पुत्रप्रार्थना-दशरथः श्लोकचतुष्टयेन आनन्दनिलयारूढ श्रीमन्नारायणं स्तुत्वा पुत्रचतुष्टयप्राप्तिवरमवाप। अत्र विषयः ११ श्लोकेषु दृश्यन्ते (व-पू-४९अ)
७. दशरथस्य वरदानात् सन्तुष्टब्रह्मादयः श्रीमन्नारायणं ९ श्लोकेषु वराहपुराणे तुष्टुवुः (व-५० अ)
८. कलिदोषोपहतेषु विशेषतः श्रीवेङ्कटेशस्य कृपाधिक्यवर्णनम् :- कृतपाधिक्यवर्णनपठनात् कष्टोद्धृताः भवोयुरिति सूतः मुनीनुद्दिश्य १९ श्लोकेषु वराहपुराणे वर्णयामास ((व-पू-५८अ)
९. श्रीवेङ्क०टेशाष्टोत्तरशतनामावळिः सूतेन मुनीनुद्दिश्य ४६ श्लोकेषु प्रोक्ता।
१०. महर्षिकृत भगवत्स्तुतिः -
महर्षयः वेङ्कटाचलमागत्य श्रीनिवासं कीर्तयित्वा स्वाम्यनुग्रहं प्राप्ताः। अस्मिन् महर्षिस्तुतिः स्वाम्यानुग्रह भाषणञ्च द्वादशश्लोकेषु वराहपुराणे दृश्यते।(व-पू-६१अ)
११. श्रीनिवासाज्ञया शङ्खनृपकृत भगवद्दिव्य विभानकथनम् : - शङ्खमहाराजेन अद्भुत विमाने श्रीनिवास साक्षात्कारलब्धि दृश्यवर्णनं ८ श्लोकेषु वराहपुराणे दृश्यन्ते (व-पू-३अ)
१२. श्रीवेङ्कटेश वैभववर्णनम्- सूतमहर्षिणा मुनिभ्यः श्रीवेङ्कटेश्वरवैभव विशेष वर्णनम् ४५ श्लोकेषु स्कान्दपुराणे ८ अध्याये दृश्यन्ते।
१३. श्रीवेङ्कटाचलारोहण समयानुसन्धानक्रमः सूतेन ७ श्लोकेषु वर्णितः स्कन्दपुराणे (स्क-पू-९अ) दृश्यते।
१४. रामानुजविप्रोत्तमस्य भगवत्साक्षात्कारानन्तरं स्तुतिः १६ श्लोकेषु स्कान्द पुराणे वर्णिता। (स्कन्द-पू११अ) श्रीनिवासेन रामानुज भक्ताय आकाश गङ्गतीर्थस्नानकाल प्रबोधः ५ श्लोकेषु स्कान्दपुराणे वर्णितः। (स्क-पू११अ)।
१५. भगवद्वर्णित भागवत लक्षणानि - : रामानुजभक्ताय उपदेशः २५ श्लोकेषु स्कान्दपुराणे ११ अध्याये वर्णितः।
१६. शौनकादीन् सूतप्रोक्त श्रीश्रीनिवास वैभवम् ४३ श्लोकेषु

आदित्यपुराणे प्रथमाध्याये वर्णितम्।

१७. श्रीनिवासमुद्दिश्य देवशर्माख्यविप्रकृतस्तुतिः १८ श्लोकेषु आदित्यपुराणे वर्णितम् (आदित्य पुराणम् १ अध्यायः।

१८. पुनः देवशर्माख्यःभागततोत्तमः भक्त्यावेशेन श्रीनिवासदिव्यमङ्गलमूर्तिं ९८ श्लोकेषु आदित्यपुराणे तुष्टाव (आदित्यपुराणम् - २ अध्यायः)

१९. पुनः देवशर्मा श्रीनिवासं आदित्यपुराणे तुष्टाव।(आ-पू-३अ) अध्यायः।

२०. देवशर्मा भगवतः विश्वरूपं ५९ श्लोकेषु आदित्यपुराणे वर्णयामास (आदित्यपुराणम् - ४ अध्यायः)।

२१. श्रीकल्याणसमये गुरुवसिष्ठकथित वधूप्रवरे श्रीनिवासस्य, कृष्णत्वेन वर्णनम् ६ श्लोकेषु कृतं भविष्योत्तरपुराणे दृश्यन्ते। (भविष्योत्तरपुराणम् ११ - अध्यायः)

२२. ब्रह्मकृत श्रीनिवासमहोत्सव वैभवप्रकारे ब्रह्मणा निर्वाहित-ब्रह्मोत्सवविशेषाः ३३ श्लोकेषु भविष्योत्तरपुराणे वर्णिताः। (भविष्योत्तरपुराणम् - १४ अध्यायः)

२३. पुरस्तात् प्रादुर्भूतं भगवन्तं प्रतिकुलाल स्तुतिः १४श्लोकेषु भ-पुराणे वर्णिता (भविष्योत्तरपुराणम् - (१४ अध्यायः)।

२४. भगवत्कृत भीमोपचाराभ्युपगमः ६ श्लोकेषु भा-पुराणे वर्णितः (भविष्योत्तरपुराणम् १४ अध्यायः)

२५. भविष्योत्तरपुराणान्तर्गत रहस्याध्यायः - श्रीवेङ्कटाचलमाहत्म्ये उमामहेश्वरसंवादे सकलोपनिषत्सिद्धान्त श्रीवेङ्कटेश्वररहस्यानुभवः ८० अध्याये १९६ श्लोकेषु भ.पुराणे अभिवर्णितः।

२६. शुकब्रह्मर्षिः श्रीनिवासं ११ श्लोकेषु पद्मपुराणेतुष्टाव (पद्मपुराणम् २७ अध्यायः)

२७. नीलकण्ठकृत नृसिंहाराधानविधिः - नीलकण्ठप्रतिष्ठत श्रीनरसिंहवर्णनम् २३ श्लोकेषु वर्णितम्।

२८. ब्रह्मादिभिः क्षीरसागरशायिनः श्रीनिवासस्थ स्तुतिः १६ श्लोकेषु पद्मपुराणे कृता (पद्मपुराणम् (३३ अध्यायः)

२९. शेषाद्रौ श्रीनिवाससाक्षात्काराय ब्रह्मादिकृतस्तुतिः ४ श्लोकेषु वर्णिता।

३०. वशिष्टानुमत्या तुम्बरुतीर्थसमीपे तपोनिमग्नया अरुन्धत्या श्रीनिवासस्यप्रत्यक्ष्य दर्शनम्। तदा अरुन्धतीकृत श्रीनिवासस्तुतिः ४ श्लोकेषु गरुडपुराणे दृश्यते। गरुडपुराणम् - ६३ अध्यायः)

३१. नारायणाख्यविप्रकृतभगवत्स्तुतिः - अत्र ब्राह्मणोत्तमनारायणतपसा प्रसन्नः श्रीनिवासः। तदा सः भक्तः भक्त्यावेशेन १४ श्लोकेषु तुष्टाव। भक्तनाम्नैव नारायणाद्रिरिति नाम आगतम्।

३२. भगवन्तमुद्दिश्य विप्रकृत सर्वजनदृश्यत्वादि प्रार्थना ६ श्लोकेषु वर्णिता।

३३. भगवत्कृपपात्रनारायणाख्यविप्रप्रार्थनाभ्युपगतप्रकारः ५ श्लोकेषु ब्रह्माण्डपुराणे वर्णितः (ब्रह्माण्डपुराणम् ३ अध्यायः)

३४. चोलचक्रवर्तिकृत श्रीनिवासस्तुतिः - तिरुमलक्षेत्र वल्मीकाविर्भूत श्रीनिवास साक्षात्कारात् चोलचक्रवर्तिकृत स्वामिस्तुतिः ९ श्लोकेषु वर्णितः।

३५. मार्कण्डेयमहर्षिकृत श्रीनिवासस्तुतिः ९ श्लोकेषु मा-पुराणे वर्णिता (मार्कण्डेयपुराणे २ अध्यायः।

३६. ब्रह्मरुद्रादिकृत श्रीनिवासस्तुतिः मा-पुराणे १० श्लोकेषु वर्णिता (मार्कण्डेयपुराणम् - (२ अध्यायः)

३७. कुमारस्वामी श्रीनिवासं १४ श्लोकेषु तुष्टाव।

३८. शतानन्देन जनकाय "आर्विभूत श्रीनिवास दिव्यमङ्गल मूर्तिवर्णनम् ४ श्लोकेषु वामदेवेन प्रोक्त वामनपुराणे ४६ श्लोकेषु अभिवर्णितम् (वामनपुराणम् क्षेत्रखण्डः ३४ अध्यायः)

३९. ब्रह्मकृत भगवत्स्तुतिः १३ श्लोकेषु वर्णिता।

४०. शम्भुकृत भगवत्स्तुतिः वामनपुराणे श्लोकेषु वर्णिता।

४१. वामदेवादिमहर्षिभिः श्रीनिवास स्तुतिः वामन पुराणे श्लोकेषु वर्णिता (वामनपुराणम् ३५ अध्यायः)

४२. सप्तर्ष्यादिकृत भगवत्स्तुतिः १० श्लोकेषु वामानपुराणे वर्णिता (वामपुराणम् - ३६ अध्यायः)

४३. सनकादि - परमयोगिकृत भगवत्स्तुतिः ११ श्लोकेषु वामनपुराणे वर्णिता (वामनपुराणम् - ३५ अध्यायः)

४४. इन्द्रादिदिक्पालककृत भगवत्स्तुतिः १३ श्लोकेषु वामनपुराणे वर्णिता (वामनपुराणम् - ३५ अध्यायः)

४५. श्वेतद्वीप वासिसिद्धकृत भगवत्स्तुतिः वामनपुराणे ८ श्लोकेषु वर्णिता (वामपुराणम् - वेदे (३५ अध्यायः) एवं १२ पुराणेषु वेङ्कटाचलमहात्म्यम् श्रीनिवासस्तुत्या सह अत्यद्भुततया वर्णितं दृश्यते।



# तिरुमलक्षेत्रपरिसरदर्शनीयस्थलानि



आन्ध्रप्रदेशराष्ट्रे तिरुपतिजिल्लास्थ तिरुमलक्षेत्रं महापुण्यक्षेत्रम्। भारतदेशे अतिमहत् धार्मिकधाम। कलियुगप्रत्यक्षदैवस्य श्रीवेङ्कटेश्वरस्वामिनः निलयभूत तिरुमलालयकेन्द्रत्वेन परिसरप्रान्तेषु बहूनि दर्शनीयस्थानानि वर्तन्ते। समुद्रजलात् प्रायशः २८०० औन्नत्यपादस्थारण्यसीम्नि अन्तर्भागः तिरुमलक्षेत्रम्। द्वौ पर्वतमार्गौ द्वौ प्रधान सोपानमार्गौ (पादयात्रिकेभ्यः) तिरुमलक्षेत्रगमनाय वर्तन्ते। तिरुमलक्षेत्रं बह्वाश्चर्यजनकविशेषस्थानम्।

नारायणगिरिस्वामिपादौ



**१. नारायणगिरिस्वामिपादौ - :** वैकुण्ठादागत्य प्रप्रथमतया भूमौ पादनिक्षिप्तदिव्यप्रदेशः नारायणगिरिः। संघटनायाः अस्याः चिह्नत्वेन श्रीस्वामिनां पादद्वयाभिव्यक्तप्रदेशः भक्तनां पादनामस्कारान् स्वीकुर्वन् दृश्यते। नारायणगिरिः उन्नतप्रदेशः इति प्रसिद्धिः। आषाढशुद्धैकादशी अथवा द्वादशीतिथौ छत्रस्थापनोत्सवः अङ्गरङ्गवैभवतया प्रवर्तते। अस्मिन् सन्दर्भे स्वामिनः पादद्वयोपरि भूचक्रछत्रं निवेश्य अर्चकस्वामिनः पूजादिकान् निर्वहन्ति। तिरुमलपर्वतपादपीठे तिरुपति पट्टणस्थितिवत् नारायणगिरिपादपीटे तिरुमल क्षेत्र स्थितिः विराजते। तिरुमलबस्टान्डुतः यात्रिकार्थं बसूसौकर्यं वर्तते।

शिलातोरणम्



**२. शिलातोरणम् -** तिरुमलक्षेत्रादारभ्य शेषाचलपर्वतश्रेणिः, प्राचीनतायाः दर्पणमिव शिलातोरणं च महासुन्दर भौगोलिकचिह्नतया वर्तेते।

श्रीवेङ्कटेश्वरः भूलोकागमनानन्तरं प्रप्रथमतः प्रथमपादं नारायणगिरिशिखरे द्वितीयपादं शिलातोरणसन्निधौ निक्षिप्तवानिति जनश्रुतिः। इदमेव तोरणं द्वारत्वेन सम्भाव्य श्रीनिवासः तस्मात् प्रस्थितः प्रस्तुततिरुमलालयंप्राप्तः इत्यैतिह्यम्। प्रयाशः दशपादौन्नत्यं २५ पादायाम - विशिष्टं इदं शिलातोरणं अन्यत्रालभ्यं अद्भुतं सत् प्रकाशते। बहुकोटिवर्षभ्यः पूर्व अयं प्रान्तः समुद्राच्छादितः आसीत्। भूपरिणामक्रमभागत्वेन बहुपरिणामसम्भवात् समुद्रस्य दक्षिणदिग्गमनं प्रवृत्तम्। अस्मिन्नेपथ्ये परिणत भोगोलिक स्वरूपमेव शिलातोरणम्।

चक्रतीर्थम्



श्रीअभयाञ्जनेयस्वामिमन्दिरम्



नागलबावि (नागलकूपः)



नक्षत्रवनम्



काल्तेरु



**३. चक्रतीर्थम् - :** दिव्यतीर्थ निलयत्वात् तिरुमलस्य अन्यन्नाम तीर्थाद्रिरिति। अत्र १०८ तीर्थाणि पुराणानि निर्दिशन्ति। एषु श्रीस्वामिचक्रायुधनाम्ना सम्भूततीर्थराजमेव चक्रतीर्थम्। तिरुमलालयस्य वायव्यदिशि ३ कि.मी. दूरे शिलातोरणसमीपे आगाधाधोभागे दृश्यमानं दिव्यं, स्थलं चक्रतीर्थम्। कदाचित् पद्मनाभनामकं विप्रं कश्चिद्राक्षसे भक्षणाय प्रवृत्ते सति तद्रक्षणार्थं श्रीहरिः चक्रायुधं प्रयुज्य तमवधीत्। तत्सन्निवेश प्रतीकात्वेन सुदर्शनचक्रत्ताल्वारु अत्र शिलायां स्वरूपत्वेन दृयमानः प्रकाशते। वृश्चिकमासद्वादश्यां स्वामिनं महावैभवोपेततया सङ्गीतवाद्यघोषैः अत्र निवेशयन्ति।

**४. श्रीअभयाञ्जनेयस्वामिमन्दिरम् -** मूलविग्रहस्य बहुकालादारभ्य स्थितत्वेऽपि आधुनिककाले केषाञ्चित् स्थनिकभक्त साहाय्यसहकारैः आविर्भूतालयनिर्माणमेव श्री अभयाञ्जनेयस्वामि मन्दिरम्। तिरुमलालयात् वायव्यदिशि वेदपाठशालागमनमार्गे आह्लादकरारण्यप्रकृतौ निर्मित महामहिमोपेतालयोऽयम्।

पुरा तिरुमलक्षेत्रं गन्तुं विद्यमानपादयात्रामार्गे मदनपल्लेमार्गस्थ भाकरापेट पर्वतसानुमार्गः एकः। अस्मात् स्थानात् आगच्छन्तः यात्रिकाः प्रथमतः भाकरापेटसमीपस्थ बालवेङ्कटेश्वरस्वामिदर्शनं कृत्वा रात्रौ तत्र निद्रानन्तरं प्रातः उत्थाय स्वामिनः पर्वतसान्वटवीमार्गद्वारा ''पुलिबोनु व्याघ्रपञ्जर - (टेङ्कयनेट्टु) नारिकेलनेट्टु मार्गद्वारा तिरुमलक्षेत्रं प्राप्नुवन्तिस्म। अस्मिन् क्रमे एव प्रादुर्भूतः विजयनगर राजकालशिलामण्टपः। मण्टपच्छायायां तत्कालाञ्जनेय स्वामी एव प्रस्तुताभयाञ्जनेयस्वामित्वेन पूजाः गृह्णाति। परन्तु पुरातनमार्गः अद्य उपयोगे नास्ति। एतदालयसमीपे तिरुमलक्षेत्रस्य ओवरुहेड्ट्यांकूसदृशमूर्तिः नायनितटाकः दर्शनीयस्थलत्वेन परिगण्यते।

**५. नागलबावि (नागलकूपः) : -** स्थानिकैः नागलकूपत्वेन व्यवह्रियमाण प्रदेशः नागलतीर्थमिति व्यवह्रियते। अत्र महावृत्ताकार शिलायां विशेषरीत्या नागाकृति शिल्पचित्राणि लिखितानि दृश्यन्ते। समीपे जलाशयोऽपि मनोज्ञतया दृश्यते। शेषाचलनामप्रसिद्धेः हेतुभूतं आदिशेषरूपं सर्पप्रतीकैव। अत्र सर्पचतुर्थीपर्वदिने विशेषपूजाः प्रवर्तयन्ति। तिरुमलालय समीपस्थ वराहस्वाम्यतिथिगृहमार्गानन्तरं बाटगङ्गम्बालयं प्राप्य तस्मात् किञ्चित्पुरोगमने सति पार्श्वगमने नागतीर्थं प्राप्तुं शक्यते।

**६. नक्षत्रवनम् - :** जातकरीत्या नक्षत्राणि सप्तविंशतिः। एकैकस्य नक्षत्रस्य एकैकदैविकवृक्षः प्रतीका। एवं सप्तविंशति नक्षत्रान्वयतया २७ वृक्षजातिषु नक्षत्राकृतौ निर्मित दिव्यवाटिकानक्षत्रवनं दृश्यते। ति.ति.देवस्थानाटवीशाखा इदं नक्षत्रवनं निर्ममे। तिरुमलक्षेत्रपापविनाशगमनमार्गे पारुवेटमणृपसमीपे इदं वनं वर्तते। संक्रान्तिपर्वदिनं पुरस्कृत्य मलयप्पस्वामिनः मृगयाविनोदार्थं आगन्तुं निर्मितमण्ट समुदायः एव पारुवेटमण्टपः। अद्यतनकाले अयं मण्टपः पुनरुद्धृतः। आह्लादकरपरिसरे नयनानन्दकरनक्षत्रवने पारुवेटमण्टपः दर्शनीयस्थलेष्वेकः।

**७. काल्तेरु - :** कलू नाम तमिलभाषायां शिला इत्यर्थः। तेरु नाम रथः शिलारथः। श्रीस्वामिने भोगरथत्वेन व्यवह्रियमाण लघुब्रह्मरथः, दारुरथः यद्यपि द्वावपि ज्ञातौ, शिलारथः बहुभिरज्ञातः एव। तिरुमलक्षेत्रे टि. बि.गार्डन्स् प्रदेशे श्रीवारिसोपानपादयात्रामार्गे आगत्य तिरुमलप्रवेशं कृतवतां दृश्यमानदृढमण्टपनिर्माणमेव प्राचीनसिलारथः। वास्तविकतया अयं मनोहरशिल्पशोभितमण्टपः बृहच्छिलाचक्रैः विशिष्टः तिरुमलक्षेत्र -

उदीचि-प्राग्दिक्माडवीथी कूटम्यां धीरगम्भीरतया तिष्टन्नासीत्। भक्तसौकर्यार्थं माडवीथी विशालीकरणक्रमे ति.ति.देवस्थानं शिलारथान् स्थलान्तरे निवेशयामास। परन्तु महाभाररथचक्राणि भूमावेव मग्नानि उत्थापयितुमशक्यान्यासन्।तस्मिन्काले विजयनगरचक्रवर्ती श्रीकृष्णदेवरायः, अच्युतरायान्तरङ्गिकाधिकारी एल्लप्पनायकरु अस्य निर्माता शालिवाहन-शके १५२७ वर्षे इमं शिलारथं तिरुमल क्षेत्रे निवेशयामास।

८. क्षेत्रपालकवृत्तशिला - : तिरुमल क्षेत्रपालकः रुद्रः। पुरा श्रीवेङ्कटेश्वरालये क्षेत्रपालक शिल्पनाम्ना महती शिला आसीत्। रात्रौ इयं शिला वृत्तवत् प्ररिभ्रमन्ती क्षेत्ररक्षणं करोति स्म। कदाचिदेकः बालकः एतच्छिलाधः पतित्वा प्राणान् तत्याज। ततः इमां शिलां आलयदूरप्रान्तगोगर्भतीर्थसमीपं प्रपयामासुः। शिवरात्रौ एतच्छेत्रपालकशिलायै अर्चनाभिषेकादयः वैभवोपेतया प्रवर्तयन्ति। तिरुमलक्षेत्रालयस्य ईशान्यदिशि कि.मी दूरे गोगर्भतीर्थपाण्डवतीर्थाणि दर्शनीयस्थालान्येव।

श्रीस्वाम्यालयस्य आग्नेयदिशि किञ्चिदुन्नतप्रदेशस्थ राजभवन सदृश महाभवनमेव हत्तरीरांजीमठः। मठस्यास्य मूलपुरुषः हत्तीरांजी बावाजी। अयं स्वामिनः उत्तमोत्तमभक्तः। स्वामी एव अनेन अक्षक्रीडां करोतिस्मेति प्रतीतिः। आंग्लेयाः तिरुमलतिरुपतिक्षेत्रे एवं अन्यालयपालनाधिकारं हत्तीरांजी मठमहन्तूनां समर्पितवन्तः। ति.ति.देवस्थान विचारण पर्यविक्षणकार्यं कुर्वन्तः एव मठमहन्तवः १९९३ वर्षपर्यन्तं कार्यं निर्वहन्ति स्म। तेषामधिकारे भक्तसौकर्यार्थं बहुपथकानि सेवाश्च कल्पिताः। निर्माणपरतया कलात्मकतया दृश्यमान-मठे महन्तूनां आवासस्थानं श्रीस्वामिना हत्तीरांजीबावाजी महोदयेनसह मनोहर-अक्षक्रीडास्थलप्रदेशः, कृष्णालयः दशावतारमूर्तयः, हनुमद्विग्रहाकृत्यदीनि दर्शनीपस्थलानि।

९. अनन्ताल्वारुपुष्पोद्यानम् - : तिरुमलालयस्य नैरुतिदिशि विद्यमानं मनोहरोद्यानवनमेव अनन्ताल्वरु पुष्पोद्यानम्। इदं महाभक्तगाथायाः सङ्केतस्थानम्। वैष्णववाङ्मयपरिभाषायां श्रीरङ्गं विष्णुकञ्चिभोगत्याग मण्टपौ स्तः।

तिरुमल पुष्पमण्टपः - तिरुमलस्वामि पुष्पकैङ्कर्याय अयं मण्टपः। आद्यः तिरुमल नम्बी अस्य एव सदाचारस्य प्रवर्तकः महानुभावः अनन्ताल्वान्।

श्रीवेङ्कटेश्वरस्वामिब्रह्मोत्सवेषु नवदिनेषु अन्तिमदिने ध्वजारोहणानन्तरदिने बागसवारि- उत्सवः महावैभवोपेततया प्रवर्तते। बाग् नाम उद्यानवनम्। श्रीदेवीभूदेवीसमेत मलयप्पस्वामिनः पुरिशै महाशयस्य उद्यानत्वेन व्यवह्रियमाण अनन्ताल्वान् उद्यानं प्रविशति। अनन्ताल्वान् बृन्दावने जात प्रवृद्ध केसरीवृक्षस्यैव पूजा प्रवर्तते। अनन्ताल्वान् महाशय तटाकखननकार्यं कुर्वन् बालकरूपेण सहायार्थ मागतस्वामिनि आग्रहेण खनित्रं दूरात् पातयामास। चिबुकं घातश्चकार। रक्तप्रसारेण इतस्ततः परिभ्रमन् सः बालकः गर्भालये प्रविश्य अन्तर्धानमभूत्। एवं अप्रदक्षिणतया आलय प्रवेशसन्दर्भं पुरस्कृत्य चिह्नत्वेन अस्यामेव रीतौ बाग्सवारि उत्सवनिर्वहणमत्र विशेषः।

तिरुमलक्षेत्रे भक्तिविश्वासभ्यां दर्शनीयस्थलानि पर्याप्तानि वर्तन्ते। एवं शङ्कुतीर्थं, तरिगोण्डवेङ्गमाम्बाबृन्दावनं, जापालितीर्थं, आकाशगङ्गा, पापविनाशतीर्थं वारधयः (Dams) शिलातोरणसमीपस्थशिलोद्यानं (Rock Garden) इत्यादिबहवः प्रदेशाः पुराणैतिह्यानि, स्वामिलीलामाहात्म्यानि, जानपदकथनानि स्थानिक कथामिलितानि भक्तजनानां मनोरञ्जकतया भासन्ते।

क्षेत्रपालकवृत्तशिला



हत्तरीरांजीमठ



अनन्ताल्वारुपुष्पोद्यानम्





16-07-2025 तिथौ तिरुमलक्षेत्रे आणिवरास्थानसन्दर्भे तमिलनाडु, श्रीरङ्गं श्रीरङ्गनाथस्वामिपक्षतः पवित्रपीताम्बरं तिरुमल श्रीवेङ्कटेश्वरस्वामिने समर्पितम् तिरुमल श्रीश्रीश्रीपूज्याग्रजियरुमठे अस्मिन् सन्दर्भे विशेषपूजाः आयोजिताः। पश्चात् माडवीथीषु प्रदक्षिणानन्तरं अग्रजियरुस्वामी, कनिष्ठजियरुस्वामी ति.ति.दे.धर्मकर्तुमण्डल्यध्यक्षः ति.ति.दे.कार्यनिर्वहणाधिकारी, तमिलनाडुराज्यदेवादायधर्मादायशाखामात्यः, श्रीवेङ्कटेश्वरस्वामिने पीताम्बराणि समर्पितवन्तः।




मैसूरुमहाराजजन्मदिन सन्दर्भे तिरुमलक्षेत्रे साम्प्रदायिकपल्लवोत्सवकार्यक्रमः 21.07.2025 तिथौ निर्वाहितः। श्रीदेवीभूदेवीसहित श्रीमलयप्पस्वामिनः उत्सवविग्रहाः शिबिकायां कर्णाटकधर्मशालां नीताः। अस्मिन् सन्दर्भे मैसूरुसंस्थान प्रतिनिधिः कर्णाटकप्रभुत्वपक्षतः भगवते स्वागतमुक्त्वा आरार्तिकं दत्वा विशेषपूजाश्चकार।



भारतदेश पूर्वोपराष्ट्रपतिः श्रीवेङ्कय्यनायुडुमहोदयः स्वपरिवारेण सह 28.07.2025 तिथौ तिरुमल श्रीवेङ्कटेश्वरस्वामिनः दर्शनं प्राप्तवन्तः। अस्मिन्सन्दर्भे पण्डितैः वेदाशीर्वचनं दत्तम्। अस्मिन् सन्दर्भे ति.ति.दे अनुबन्धकार्यनिर्वहणाधिकारिणा तीर्थ प्रसादाः दत्ताः। अस्मिन् कार्यक्रमे ति.ति.दे धर्मकर्तुमण्डलसदस्याः ति.ति.दे. अन्याधिकारिणश्च भागं गृहीतवन्तः।



तिरुमलान्नमय्यभवनपुरतः नूतनवाणी दर्शनटिकेट्केन्द्रं ति.ति.दे. धर्मकर्तुमण्डल्यध्यक्षः, ति.ति.दे. कार्यनिर्वहणाधिकारी च उद्घाटयामासतुः। अस्मिन् सन्दर्भे ति.ति.दे. धर्मकर्तुमण्डलीसदस्याः, ति.ति.दे. अनुबन्ध कार्यनिर्वहणाधिकारी, अन्याधिकारिणश्च भागं गृहीतवन्तः।






28.07.2025 तिथौ ति.ति.देवस्थानं अपि च ति.ति.देवस्थान धर्मप्रचारपरिषत् - संयुक्ताध्वर्ये ''सद्गमय'' नामक प्रशिक्षणकार्यक्रमः आयोजितः। तिरुपतिस्थ यस्.जि.यस्. पाठशालायां अस्य कार्यक्रमस्य प्रारम्भोत्सवः कृतः। अस्मिन् सन्दर्भे धर्मप्रचारपरिषथः कार्यदर्शी ति.ति.देवस्थान विद्याशाखधिकारी, अन्याधिकारिणश्च भागं गृहीतवन्तः।

# सरस्वतीदेवी महत्त्वम्



- आचार्य जि.पद्मनाभम्, चरवाणी -९२४७३२८२८६

शक्तिस्वरूपिणी सरस्वती ब्रह्मणः पत्नी। समस्तसृष्टेः प्रजोत्पदनशक्तिः जगन्मातैव। प्रायशः सरस्वती इति पदस्य प्रवाहनदीत्यर्थः ऋग्वेदे इयं नदीति तदधिष्ठानशक्तिरिति **(Presiding Deity)** वर्णिता। अतः इयं पवित्रायाः प्रतीका फलप्रदात्री प्रकाशमाना देवता। इयं देवी सारप्रदात्री शारदा वागधिष्ठान शक्तिः वागीश्वरी ब्रह्मणः भार्यारूपिणी ब्राह्मी पराविद्या इत्यर्थप्रदायकमहाविद्येति भक्ताः इमां भजन्ते पौराणिकावङ्मये एतत्सम्बन्धिन्यः बह्यः गाथाः वर्तन्ते। प्रवहदिति आलङ्कारिकार्ये वागिति ग्रहणे, सृष्टिनिर्माणाय पूर्वभावनेति बुद्धिधरित्यवगम्यते। पश्चादेव व्यक्तीकृतसृष्टिरब्धा।

सर्वासां कलाणां शास्त्रणां, वृत्तीनां कौशलामामियं चैतन्यदात्री। अज्ञानं अन्धकारः इति ज्ञानं प्रकाशः अथवा श्वेतवर्णः इति तुलनात्मकतया वदामः। अस्याः वर्णः श्वेतवर्णः, इयं समस्तकलाधिष्ठात्रीत्वात् सुन्दररूपेण भासते। शुभ्रवस्त्रधारिणी पद्मासनाभवतीयम् हस्ताचतुष्टये वीणां, अक्षमालां पुस्तकानि च धरति। प्रायशः अस्याः पाशाङ्कुश पद्मत्रिशूलशंखचक्र धरविग्रहाः अपि दृश्यन्ते। पञ्चमुखैः अष्टभुजैः विद्यामान विग्रहाः अपि तत्र तत्र भारते दृश्यन्ते। नयनत्रयेण नीलकण्टेन विद्यमान विग्रहाः अपि दृश्यन्ते। अस्मिन् रुपे इयं महासरस्वतीति आहूयते। अर्थात् दुर्गा पार्वतीति प्रत्येकरूपेण इमामाराधयन्ति। ब्रह्मणः हंसः एव अस्याः वाहनम्। केषुचित्पुराणेषु सरस्वत्याः मयूरवाहनमपि वर्णितम्। विग्रहप्रतीकानां अन्तरार्थमेवं जानीमः। सरस्वती ब्रह्मणः शक्तिरिति तस्य बुद्धिरित्यवधेयम्। तया बुद्धिशक्त्या विना सृष्टिनिर्माण कार्यक्रमः एव न स्यात्। अतः बुद्धि शक्तिरद्भुता। शुद्धेति श्वेतरूपेण कान्तिमतीतिवर्ण्यते। तस्याः हस्तयतुष्टयं चतुदिक्सु व्यात्पशक्तं सर्वव्यापकत्वं सूचयति विद्याधिदेवतात्वात् वामहस्ते पुस्तकधरत्वं युक्तमेव। इदं पुस्तकं समस्त भौतिकविद्यानां सङ्केतः। उन्नतभावरहितं बुद्धिकौशलं रसहीनायःशलाकेव। अतः हस्ते वीणां धरति। वीणा ललितकलाणां सङ्केतः। दक्षिणहस्ते अक्षमाला समस्ताध्यात्मिकविद्याः तपः, ध्यानञ्च सूचयति। वामहस्तपुस्तकं दक्षिणहस्तस्थाक्षमाला च भौतिक विद्यापेक्षया पराविद्यायाः**(Super Knowledge)** प्रामुख्यं कथयतः।

पिंछंसहित मयूरवाहनं बौतिकविद्याः सूचयति भौतिकविद्याः साधकं मानसिककल्लोले पातयन्ति भिन्नभिन्नवार्ण- विशिष्टमयूरोऽपि सर्वानाकर्षति। अतः मयूराधिरोहणं नाम अविद्यादमनमिति भावनीयम्। क्षीरजलमिश्रितं हंसः पृथक्कृत्य क्षीरमेव गृह्णाति। अयमेव विवेकः। सरस्वती हंसवाहिनीति भावनया विवेकसहित विद्यास्वरूपिणीति मन्तव्यम्। भौतिकशास्त्र सम्बन्धिनी अविद्या। विद्या नाम आध्यात्मिक विद्या पराविद्या मोक्षमार्गप्रदर्शिनी। अविद्यायां निर्लक्ष्यभावः त्यज्यः। जीवः अविद्याया मृत्युं

तीर्त्वा विद्यया अमृतमश्नुत इति ईशावास्योपनिषत्सन्देशः। भौतिकज्ञानात् क्षुद्दाहनिवृत्तिरेव स्यात्। परन्तु परमशान्त्यर्थं पुनरावृत्तिराहित्यार्थं आध्यात्मिकविद्या अध्येतव्या। अतः सरस्वत्या मयूरवाहन हंसवाहन स्वीकरणे परमार्थः वर्तते। अनादिकालादारभ्य भारतदेशमेव सरस्वतीदेशमिति वदन्ति। वेदकालादारभ्य पूजार्चनं स्वीकुर्वन्ती हिन्दूनामाराध्यदेवता भवति। आश्वयुजमास शरन्नवरात्रे मूलानक्षत्रदिने सरस्वतीदेव्यैः विशेषपूजाः समर्प्यन्ते। सन्दर्भमियं पुरस्कृत्य सरस्वतीदेवी मधिकृत्य ज्ञाव्याशाः बहवस्सन्ति। ऋग्वेद ''नदी तमे देवतमे सरस्वति'' इति वर्णिता। स्रष्टु ब्रह्मणः पुत्री, भार्या नदीरूपा, भारतीय संस्कृतौ वर्णमाला रूपा सती संस्तुत्यते। एवं वेदपुराण नदीशब्दसरस्वतीरूपेण पूजाग्रहिणी इयं महासरस्वती वज्र सरस्वती, वज्र वीणासरस्वती आर्यसरस्वती वज्रशारदेति वर्ण्यते।

नन्दिवर्धन, वकुल पद्म मन्दार पलाश बिल्वादिपत्राणि। सरस्वत्याः इष्टपूजापत्राणि। सांक्यदर्शने इयं प्रकृतिरिति कथ्यते। वेदविदः इमां गायत्री गौरीति कथयन्ति। वर्षसहस्र पूर्वं सरस्वतीनदी भारतदेशस्य उत्तरवायव्यपश्चिमदिक्सु प्रवहन्ती सिन्धुसमुद्रे मिलतिस्म। कि. पूर्वं १५०० वर्षे अन्तर्वाहिनी रूपत्वेन परिणता मनोकाशे स्मृति पथो वर्तते। सरस्वत्याः वह्वयः उपनद्यः अपि सन्ति। अस्याः नद्याः प्रवाहः १६०० कि.मी,.पर्यन्तं वर्तते। पञ्चविंशतिब्राह्मणेऽपि सरस्वतीनदी केवलमन्तर्वाहिणी नदीति वर्णितम्। शरन्नवरात्रे मूलानक्षत्रादारभ्य श्रवणानक्षत्रपर्यन्तं शक्त्युराधकत्वेन श्रीमातुः उपासकविशेषकरुपेण मूलानक्षत्र पूजाः मूलानक्षत्र प्रवेश दिनं सरस्वती पूजा दिनम् सम्पन्नाः। मूलानक्षत्रं शुभफलप्रदनक्षत्रमिति प्रोक्तम्। महा कवि वररुचिरपि कुप्यत्केसरीपञ्च इति वृश्चिकादिपञ्चनक्षत्र समूह एव मूलानक्षत्रमिति निर्दिदेश। सरस्वती जन्मदिनमेव मूलानक्षत्रम्। नवरात्र्युत्सवेषु मूलाजन्मदिनं सरस्वती पूजायाः अत्यन्तं प्राशस्त्यं ज्यौतिषग्रन्थेषु दृश्यते। आश्वयुज शुद्ध सप्तमीदिनाङ्के अस्मिन्वर्षे सेप्टम्बर् २९ तिथौ मूलानक्षत्रदिने सरस्वत्याः पूजादिनम्। अस्मिन्दिने भारतदेशे विदेशेषु च हैन्दवाः विद्यालायेषु गृहेषु च सरस्वतीपूजां वैभवोपेततया निर्वहन्ति।

**सरस्वतीपूजाविधानम् -** मूलानक्षत्रे शुचिमत्पीटे श्वेतशुभवस्त्रं भूमौ प्रसार्य तस्मिन् पुस्तकानि निक्षिप्य तेषु सरस्वती आवाहनीया। आवाहनात् पूर्वं ध्यानं कर्तव्यम्। सरस्वती चित्रपटोपरि पुष्पमाला अलङ्कर्तव्या हास्ते अक्षताः पुष्पाणि च निक्षिप्य पूजापीठपुरतः सुखासने उपविश्य पुरतः विद्यामानेषु पुस्तकेषु सरस्वती भावना भावनीया। ध्यानश्लोकं पुष्पाणि अक्षतांश्च पुस्तकरूप सरस्वत्यां प्रकीर्य तस्याः दिव्यप्रकाशः श्वासरूपे अस्मासु प्रविशद्भावना कर्तव्या।

**ध्यानश्लोकः -** प्रणमामि जगत्पूज्यां शारदां विशदप्रभां। श्रितपद्मासनां देवीं त्र्यम्बकीं शशिभूषणां।। (व्रतचूडामणिः)

**२. प्रणवासनामारूढां तदर्थत्वेन निश्चिताम्**
**सितेन दर्पणाभेन वस्त्रेण परिभूषिताम्।**
**शब्दब्रह्मात्मिकां देवीं शरच्चन्द्रनिभाननाम्**
**अत्रागच्छ जगद्वन्द्ये सर्वलोकैक पूजिते।।**

मयाकृतामिमां पूजां संगृहाण सरस्वति। मातुराह्वानानन्तरं नघुपूजा कर्तव्या। अनन्तरदिने पुनः पूजा कर्तव्या महानवम्यां उत्तराषाढ महानैवेद्यं सिद्धं कर्तव्यम्। आसन-पाद्य-अर्घ्य-आचमनीय-मधुपर्क-पञ्चामृतस्नान-वस्त्रयुग्म-उपवीत-आभरण-हरिद्राकुङ्कुम तिलकगन्ध अक्षता-पुष्पमालाः समर्प्य पुष्पादिभिः सम्पूज्य धूपदीपनैवेद्य ताम्बूलादीनि समर्प्य कर्पूरनीराजनं दत्वा मन्त्रपुष्पाञ्जिलं कृत्वा प्रदक्षिण नमस्काराः कर्तव्याः। तत्तदुपचारार्थं पूजाग्रन्थस्थ श्लोकाः पठनीयाः। सर्वाङ्गपूजानन्तरं अष्टोत्तरशतनामपूजा कर्तव्या।

**१.अर्कचम्पकपुन्नाग नन्द्यावर्तं च पाटलम्**
**बृहतीकरवीरञ्च द्रोणपुष्पाणि चर्चयेत्।**
**द्रोभिर्युक्ता चतुर्भिः स्फटिकमणिमयीमक्षमालां दधानाम्।**
**हस्तेनैकेन पद्मं सितमपिशुकं पुस्तकेन चापरेण।**
**भासाकुन्देन्दुशङ्ख स्फटिकमणिनिभा भासमानाऽसमाना।**
**सामेवाग्देवतेयं निवसतु वदने सर्वदा सुप्रसन्ना।।**
**२. चतुर्दशसु विद्यासु रमते या सरस्वती।**
**सा देवी कृपया मह्यं जिह्वासिद्धिं करोतु च।।**

एवं सरस्वतीं पूजयित्वा महानवम्यां नैवेद्यं समर्प्य श्रवणानक्षत्रे उद्वासना कर्तव्या।

**विमलपटीकमलकुटी पुस्तकरुद्राक्ष शस्तहस्तपुटी**
**कामक्षी पक्ष्मलक्षी कलितविपञ्ची विभासि वैरिञ्ची।।**



# अनन्तपद्मनाभस्वामिनः व्रतकथाः

- डा.वि.माधवरेड्डि
चरवाणी - ८५१९८०४७८४

अनन्तः प्रतिगृह्णाति अनन्तो वै ददाति च।
अनन्तस्तारकोभाभ्यां अनन्ताय नमो नमः।।

व्रतविधानम् -

पौराणिकः सूतः शौनकादिमहामुनीनुद्दिश्य अनन्तपद्मनाभस्वामिकथामेवं विवृणोति - : लोकेदारिद्र्य निवारणार्थमेकं प्रशस्तं व्रतं वर्तते। तद्व्रतकथां श्रुण्वन्तु। कालकर्मवशात् पाण्डवानामरण्यवासे संप्राप्ते तदा पाण्डवाः भगवन्तं कृष्णमेवमपृच्छन्। भगवन्! बहुक्लेशजीवनं यापयतामस्माकं जीवनमार्गे तरणोपायं कथयान्तु इति। तदा श्रीकृष्णः धर्मराजमुद्दिश्य - सर्वेभ्यः सकलपापपरिहारार्थं सौभाग्यप्रदं अनन्तपद्मनाबव्रतं वर्तते। इदं भाद्रपदमासशुक्लचतुर्थीदिने एव आचरणीयम्। एतद्व्रताचरणात् पुत्रपौत्राभिवृद्धिः, यशः, सुखशान्तिश्च लभेयुः। अहमेव अनन्तः सृष्टिस्थितिलयकारकः। कालगमनस्य आद्यः। अनन्तनाम भूभारनिवारणार्थं राक्षस संहारार्थं वसुदेव गृहे जातः। अहमेव विष्णुः कृष्णः हरिहरब्रह्मरूपः। ममहृदयान्तराले (चतुर्दशरुद्राः) अष्टवसवः, एकादशरुद्राः, द्वादशादित्याः, सप्तर्षयः भूर्भुवस्वः लोकाः वर्तन्ते इत्यवोचत्। एतच्छ्रुत्वा धर्मराजः तद्व्रतं कथं कर्तव्यम्। तत्र पूज्यदेवः कः इति धर्मजस्य प्रश्नस्य समाधानतया श्रीकृष्णः एवं वक्तुमारेभे - : कृतयुगे वेदशास्त्रसम्पन्नस्य वशिष्ठगोत्रोद्भवस्य सुमन्तनामक ब्राह्मणस्य भृगुमहर्षेः पुत्र्या दीक्षादेव्या विवाहः सम्पन्नः। तस्य दाम्पत्यस्य शीला, नमकसुगुणराशिः पुत्रिका अजायत्। कालक्रमवशात् दीक्षादेवी तापज्वरेण दिवङ्गता। सुमन्तः कर्कशनामिकां लोभिनीं दुस्स्वभावां अन्यां कन्यां पर्यणैषीत्। सुता शीला तु पित्रनुगुणतया भक्तिश्रद्धाभ्यां पितृशुश्रषया कालं यापयतिस्म। युक्तवयस्को पुत्रिकां कौण्डिन्यमहामुनये अर्घ्यपाद्यादिभिः सत्कृय तदङ्गीकारात् विवाहाय ददौ। पुत्रिकां जामातृगृहप्रेषणसमये पारितोषिकं भार्यया कर्कश्या तिरस्कृतोऽपि स्वयं विवाहसमये भोजनपदार्थेषु शिष्टं सक्तुपिष्टं दत्वा जामातारं प्रेषयामास। ततः कौण्डिन्यः सदाचारसम्पन्नया भार्यया स्वाश्रमं प्रस्थितवान्। मार्गमध्ये सन्ध्यावन्दनादिक्रियाः समाप्य जलाशयसमीपं ययौ। तद्दिनमनन्तपद्मनाभव्रतदिनम्। तत्र स्त्रियः रक्तवस्त्राणि धृत्वा अनन्तपद्मनाभस्वामिनं पूजयन्ति स्म। परमभक्ता शीलापि व्रतासक्ता व्रतविधानं ताः अपृच्छत्। ताः स्त्रियः शीलामुद्दिश्य एवमूचुः : - अनन्तपद्मनाभव्रताचरणात् अनन्तफलानिलभेयुः। महत्तरप्रभावोपेतमिदं व्रतम्। भाद्रपदशुक्लचतुर्दश्यां नद्यां वा तटके वा स्नानमाचर्य शुचित्वेन शुभ्रवस्त्राणि धृत्वा पूजास्थलं गोमयपूतं कृत्वा अष्टदलपद्माकारः मण्टपः निर्मेयः। तन्मण्टपपरितः रङ्गवल्लीभिरलङ्कृत्य दक्षिणपार्श्वभागे उदकपूरितकलशं संस्थाप्य अनन्तपद्मनाभस्वामिनं दर्भैः रूपवन्तं कृत्वा तस्मिन् तमावाहयित्वा - दर्भमयं देवं श्वेतद्वीपस्थितं हरिम् समन्वितं सप्तफलैः पिङ्गलाक्षं चतुर्भुजम्।।

इति श्लोकेन ध्यानं कृत्वा कल्पोक्तप्रकारं षोडशोपाचार पूजया प्रदक्षिणनमस्कारान् कृत्वा चतुर्दशसूत्रयुत्र कुङ्कुमार्द्रे नूतनतोरं पद्मनाभस्वामिसमीपे निक्षिप्य पूजयित्वा पञ्चपडिसमानगोधूमपिष्टेन अष्टाविंशति अतिरसान् ब्राह्मणेभ्यः वायनदानं दत्वा शिष्टानि स्वयं भोक्तव्यानि। पूजाद्रव्याणि चतुर्दश भागत्वेन विभगीकर्तव्यानि। पश्चात् ब्राह्मणा समाराधनं कृत्वा अनन्तपद्मनाभस्वामिध्यानं कर्तव्यम्। एवं व्रतं समाप्य वर्षे वर्षे उद्यापनं कृत्वा पुनः व्रतमाचरणीयम् इत्यूचुः। ततः कौण्डित्यः स्वभार्यया शीलया सह तटाके स्नानमाचचार। तत्रस्थस्त्रीसाहाय्यात् शीला व्रतमाचर्य तोरं हस्ते बद्ध्वा मार्गे पितृदत्त सक्तुपिष्टं वायनदानं कृत्वा संन्तृप्तेन भर्त्रा शकटमारुह्य स्वाश्रमं जगाम। व्रतप्रभावात् आश्रमः स्वर्णमयोभूत्वा ऐश्वर्यविशिष्टः आसीत्। तौ दम्पती अतिथिसत्कारमचरन्तौ सुखं कालं यापयतः। एवं गच्छति काले परिपूर्णभक्ति रहितः अपवित्रमनस्कः कौण्डिन्यः शीलया बाहुधृततोरं दृष्ट्वा किमर्थ तत्तोरम्? मां वशीकर्तुं वा इति तामपृच्छत्। हे प्राणनाथ! अहं अनन्तपद्मनाभस्वामितोरं धृताऽस्मि। तद्देवानुग्रहात् अस्मद्गृहं ऐश्वर्यसम्पन्नं जातमित्यवोचत्। तद्वचनं श्रुत्वा कौण्डिन्यः तस्यां कुपितः तत्तोरं अग्नौ पातयामास। शीला हाहाकारैः धावित्वा तत्तोरं स्वीकृत्य क्षीराद्रं चकार। केषुचित् दिनेषु गच्छत्सु तद्गृहसम्पत् सर्वा विनष्टा जाता। न कोऽपि ताभ्यां भाषतेऽस्म। उभौ क्षुत्बाधापीडिताः आस्ताम्। कौण्डिन्यः गतं सर्वं स्मृत्वा दैवदूषणादेवं जातमिति पश्चात्तप्तः अनन्तस्य नाम जपन् आम्रवृक्षसमीपं जगाम। न कोऽपि तदवृक्षंपुष्पफलभरितं स्पृशाति स्म। सः तं वृक्षराजं सम्बुद्ध्य अनन्तनामकं दैवं दृष्टोऽसि वा इत्यपृच्छत्। सः वृक्षः नाहं जानामीत्यवोचत्। एवं सः गच्चन् मार्गे तृणभूमौ परिभ्रमन्तं, वृषभं, तटाकस्थपद्मानि गजं, गार्दभञ्च अनन्तपद्मनाभं दृष्टोऽसि वा इत्यपृच्छत्। ते सर्वे न वयं अनन्तपद्मनाभं जानीमः इति एकैकशः अवोचन्। तदा दैन्येन मार्गे मूच्छितः सः कौण्डिव्यः भूमावपतत्। पापपरिहारेणैव भगवद्दर्शनमित्युक्तरीत्या दयावान् भगवान् कौण्डिन्यपापनाशात् वृद्धरूपेण आगत्य स्वगृहं नीत्वा गरुडसेवित शंखचक्रगदाधर स्वस्वरूपं पद्मनाभः सन्तुष्टः तस्मै दर्शयमास। सः कौण्डिन्यः नमो नमस्ते। वैकुण्ठ श्रीवत्सशुभलांच्छन! त्वन्नामस्मरणात् वसुशेषं न प्रणश्यति गोविन्द नारायण जनार्दन इति बहुधा पद्मनाभं तुष्टाव। तुष्टः पद्मनाभः तं दारिद्र्यरहितं कृत्वा अन्त्यकाले विष्णुलोकप्राप्तिवरं ददौ। ततः मार्गे आम्र गो वृषभ जलाशयस्थ पद्मगजगार्दभाः किमर्थं त्वां न जानीमः इत्यवोचन्निति प्रश्नस्य भगवान् पद्मनाभः एवं समादधौपुरा। ब्राह्मणः कश्चित् सकलविद्यागर्वितः स्वविद्यां कस्यापि न बोधयामास। अतस्सः निरुपयोगाम्रवृक्षरुपः जातः, इति अन्यः भाग्यवानपि दानाचरणं अकुर्वन् अन्ते ब्राह्मणस्यापि अन्नदानानाचरणात् पशुजन्म, स्वीकृत्य तृणभूमौ सञ्चरतीति, तटाकौ द्वौ धर्माधर्मौ। तत्र पद्मानि नित्यमानवदूषणात् गार्दभः एकः अन्यः धर्मविक्रयात् गजश्च जाताविति तेषां पूर्वजन्मस्थितिमुवाच।

त्व चतुर्दशवत्सराणि अनन्तव्रतमाचर्य नियमानुसरं आचरिष्यसि चेत् नक्षत्रलोकंप्राप्स्यसीत्यक्त्वा पद्मनाभः अन्तहितः बभूव। ततः कौण्डिन्यः गृहं गत्वा शीलायाः भार्यायाः सर्वं भगवद्दर्शनवृत्तान्तमुक्त्वा चतुर्दशवर्षपर्यन्तं अनन्तव्रतं कृत्वा इहलोके पुत्रपौत्रसम्पनः प्राप्य अन्ते नक्षत्रस्थानमवाप इत्युक्त्वा श्रीकृष्णः, अगस्त्यमहामुनिरपि पद्मनाभव्रतमाचर्य प्रसिद्धिमवापेति सगरदिलीप हरिश्चन्द्रादयः राजानः पद्मनाभव्रतमाचर्य महयशः प्राप्य स्वर्गमवापुः। एतद्व्रतकथा श्रोतारः इहलोके अष्टैश्वर्यसुखमवाप्य अन्तेपरमपदं विष्णुलोकं प्राप्ताः इति व्रतकथां समापयामास।

मङ्गलं भगवन् विष्णो मङ्गलं मधुसूदन
मङ्गलं पुण्डरीकाक्ष मङ्गलं गरुडध्वज।
नीलाचलनिवासाय नित्याय परमात्मने
श्रीलक्ष्मीप्राणनाथाय जगन्नाथाय मङ्गलम्।।





अहो निर्धनता सर्वापदामास्पदम्।

# अतिलोकसुन्दरीषणास्पर्धा आत्मविनाशायैवहि केवलम्

-डा.यन्.गुणवती

चरवाणी - ८९१९६२०२२६



पुरा हिरण्यकशिपोः वंशे निकुम्भः इति नाम्ना महाराक्षसः आसीत्। तस्य महापराक्रमौ, बलिष्ठौ द्वौ पुत्रौ आस्ताम्। सुन्दोपसुन्दनामकौ तौ द्वावपि क्रूरमनस्कौ भयङ्करौ च। द्वावपि एकं विना एकः वसितुं न शक्तौ। एकेन निश्चयेन प्रतिकार्यं आचरतः। द्वयोः कृते सुखदुःखे पृथक् न स्तः। एकस्मिन् समये उभावपि मिलित्वा त्रिलोकान् जेतुं संकल्पं कृत्वा विन्ध्यपर्वते तपः चक्रतुः। तयोः तीव्रं तपः दृष्ट्वा देवताः भीताः अभवन्। ताः देवताः सुन्दोपसुन्दयोः तपः भग्नं कर्तुं प्रयत्नान् कृतवन्तः। किन्तु अशक्ताः अभवन्।

किञ्चित् कालानन्तरं लोकहितार्थी ब्रह्मदेवः सुन्दोपसुन्दयोः तपसा सन्तुष्टः भूत्वा तयोः पुरतः आगत्य ''वरं वृणीयातां'' इत्युवाच। द्वावपि अनेकश्रेष्ठवरान् याचित्वा अमरत्वमपि दातव्यम् इति पृष्ठवन्तौ। अमरत्वं विना सर्वान् ददामि किन्तु अमरत्वं दातुम् अशक्तोऽहम् इति चतुर्मुखः उवाच। तदा ''आवयोः परस्परकलहादेव मृत्युः भवितव्यम्'' इति ताभ्याम् वरं दातुं पृष्टम्। चतुर्मुखः अपि तथास्तु इत्युक्त्वा अदृश्यः अभवत्। तौ सोदरौ ब्रह्मणः वरान् लब्ध्वा गर्वेण लोकत्रयेणापि अवध्यौ अभवताम्। त्रिलोकाधिपत्यार्थं तीव्रपराक्रमेण युद्धं कृत्वा स्वर्गं जित्वा लोककण्टकौ अभवताम्। महात्मनाम् शापाः अपि ब्रह्मदेवस्य वरबलेन असफलाः अभवन्। देवताः, महर्षयः मिलित्वा सत्यलोकं गत्वा तेषां दीनस्थितिं ब्रह्मदेवं निवेदयामासुः। देवतानां कष्टं दृष्ट्वा ब्रह्मदेवः विश्वकर्माणं आहूय एकस्याः दिव्यसुन्दर्याः सृष्टिं कुरुष्व इति आदिदेश। विश्वकर्मा अपि सम्यक् चिन्तयित्वा उत्तमरत्नेभ्यः सारं तिलपरिमाणं स्वीकृत्य एकस्याः सुन्दर्याः सृष्टिं चकार। तिलोत्तमा ब्रह्मदेवं नमस्कृत्य तस्याः कर्तव्यं प्रति पृष्टवती। तदा ब्रह्मा ''हे तिलोत्तमे! त्वं सुन्दोपसुन्दयोः समीपं गत्वा भवत्याः सौन्दर्येण उभयोः मध्ये विरोधं सृज'' इति उवाच। तदा तिलोत्तमा सर्वान् नमस्कृत्य कर्तव्योन्मुखी भूत्वा ततः गतवती।

विन्ध्यपर्वतशिखरे अनेकस्त्रीभिः विचरन्तौ आनन्दं अनुभवन्तौ सुन्दोपसुन्दौ आस्ताम्। तस्मिन् समये तत्र रक्तवर्णवस्त्रं धृत्वा विचरन्तीं तिलोत्तमां दृष्ट्वा द्वावपि उन्मत्तौ अभवताम्। मद्यपानात् रक्तवर्णनेत्राभ्यां कामपीडितौ अभवताम्। तिलोत्तमायाः समीपं गतवन्तौ तौ पापत्मानौ'' एषा मम स्त्रीः, एषा मम स्त्रीः'' इति विवदन्तौ आस्ताम्। तिलोत्तमायाः सौन्दर्यमोहेन द्वयोः मध्ये स्नेहः सौहार्द्रं च सर्वं नष्टम् अभवत्। परस्परं तिलोत्तमा प्राप्त्यर्थं गदादण्डैः ताडितवन्तौ। ब्रह्मवाक्प्रभावेण परस्परगदाधातैः भूम्युपरि पतित्वा मरणं प्राप्तवन्तौ। एवं पापात्मानौ द्वावपि अतिलोकसुन्दरीप्राप्तिस्पर्धया विगतचेतस्कौ बभूवतुः। अत एव अतिलोकसुन्दरीस्पर्धा आत्मविनाशायैवहि केवलमित्युक्तम्। पाण्डवाः पञ्च इन्द्रप्रस्तपुर्यां द्रौपद्या सह सुखं कालं यपयन्तिस्म। एकभार्याकृते परस्परविवादः मास्तु। विवादश्चेत् सुन्दोपसुन्दाविव नाशं प्राप्नुयुरिति नारदः पाण्डवानुद्दिश्य इमां नीतिमुपदिदेश।

(महाभारतादिपर्वकथा - )

चित्रकथा

# आदौ गुरुः शिलावत्कठिनोऽपि अन्ते घृतवत् द्रवीभवद्दयासमुद्रः

तेलुगुमूलम् - 'कलारत्न' डा.कम्पेल्ल रविचन्द्रन्
चित्राणि - श्री तुम्बलि शिवाजी
संस्कृतानुवादः - डा.के .सूर्यनारायणरेड्डि
चरवाणी - ८१०६५७८२५०





आत्मानं सततं रक्षेत् दारैरपि धनैरपि।



कुमार! धेनवः दयास्वभावशीलाः वत्साः तदपेक्षया दयास्वभाववन्तः। त्वं फेनं स्वीकरोषीति त्वदर्थं अधिकं फेनं त्यजन्ति। अतस्त्वं फेनपानमपि त्यज। फेनपानं तव युक्तं न भवति।
रात्रौ बहुकालः अतीतः अन्धकारः सर्वत्र व्याप्तो भवति। गावः आगताः परन्तु उपमन्युः नागतः।किं कारणम्
गुरुः उपमन्युं अन्विषन् गतः।
कुमार! उपमन्यो! उपमन्यो!
गुरुदेव! स्वामिन्! अहमत्र कूपे।
उपमन्यो! इयंदुर्घटना कथं सञ्जाता।
गुरु देव! भवता मामुद्दिश्य फेनमपि न स्वीकरणीयमिति निषिद्धोऽस्मि। उपवासं करोमि। प्रत्यहं दिवा गोभिः तृणभक्षणानन्तरं सायं आश्रमं प्राप्तोऽस्मि। एवं बहूनि दिनानि गतानि। क्षुत्पीडितः अर्कपत्राणि आहारत्वेन स्वीकृतोऽस्मि। विषभरितपत्रखादनात् शरीरं विषमयं सत् नयन दृष्टिः विनष्टा। तथापि गोगमनपादशब्द मनुसृत्य आगच्छामिस्म अस्मिन्दिने अकस्मात् अप्रयत्नेन अस्मिन् कूपे पतितोऽस्मि। गावः सुरक्षितं आश्रमं प्राप्ताः न वेति विचारयामि स्म। एतावता भवन्तः आगताः।
कुमार! अद्य तव मन्त्रोपदेशं करिष्यामि। तन्मन्त्रप्रभावात् अश्विनीदेवते प्रसन्ने कृत्वा तद्दत्तक्षीरं पिब। नष्टदृष्टिः पुनरागमिष्यति।
उपमन्योः अश्विनी देवतेप्रत्यक्षीभूते।
कुमार क्षीरमिदं पिब।
हे अश्विनीदेवते! गुरोरनिवेद्य नाहं स्वीकरिष्यामि।
हे उपमन्यो! तव गुरुभक्तेः आश्चर्यवन्तौ सन्तुष्टावभूताम्। त्वमद्यपुनः दृष्टिभाग्यं प्राप्तोऽसि।
कुमार! मच्छिष्यपरीक्षायां कृतार्थोऽसि। मदधीत सर्वशास्त्राणि अध्यापयिष्यामि।
गुरुदेव! भवदाशीर्वादः! भवन्तः बाह्यदृष्ट्या कठिनाः अपि अन्तरङ्गे घृतमनस्काः इति ज्ञातोऽस्मि। धन्योऽस्मि गुरो।


स्वस्ति




प्रदत्तं चित्रपटम् बिन्दुसाहाय्येन पूरयामः वा?

अस्य चित्रपटस्य रञ्जनं कुर्मः वा?







अयं विद्यार्थी कं मार्गं अनुसृत्य बालक्रीडकानां आयोजनं प्राप्स्यति।










करारविन्देन पदारविन्दं
मुखारविन्दे विनिवेशयन्तं।
वटस्य पत्रस्य पुटे शयानं
बालं मुकुन्दं मनसा स्मरामि।।



श्रीवाणीगिरिजाश्चिराय दधतो
वक्षोमुखाङ्गेषु ये
लोकानां स्थितिमावहन्त्यविहतां
स्त्रीपुंसयोगोद्भवां।
ते वेदत्रयमूर्तयः स्त्रीपुरुषाः
सम्पूजिताः वस्सुरैः
भूयासुः पुरुषोत्तमाम्बुज
श्रीकन्धराः श्रेयसे।।

इह प्रेत्य च नारीणां पतिरेको सदा गतिः।




Printed by Sri R.V.Vijaya Kumar, B.A.B.Ed. and Published by Dr.V.G. Chokkalingam, M.A., Ph.D.,on behalf of Tirumala Tirupati Devasthanams and Printed and Publised at Tirumala Tirupati Devasthanams Press, K.T. Road,Tirupati 517 507.
Editor : Dr.V.G. Chokkalingam, M.A., Ph.D.



मैसूरुमहाराजसंस्थाने दशरा-उत्सवान्तर्गततया आयोजितदुर्गापूजा सम्बन्धवर्णचित्रमिदम् 1934-1945 वर्ष मध्यकाले
तत्कालीनचित्रकारेण श्रीवैसुब्रह्मण्यराजुणा निर्मित वहुवर्णसंयुक्त चित्रमिदम्।
छायाचित्रसौजन्य - मैसूरुप्रासाद वोर्डु 2007

SAPTHAGIRI (SANSKRIT) SPIRITUAL ILLUSTRATED MONTHLY PUBLISHED BY
TIRUMALA TIRUPATI DEVASTHANAMS PRINTING ON 25-08-2025 & posting at Tirupati
RMS Regd.with the Registrar of Newspapers for India under RNI No.21138/1970 Postal
Regd. No. TRP/154/2024-2026" LICENCED TO POST WITHOUT PREPAYMENT
No.PMGK/RNP/WPP-04(4)/2024-2026" Posting on 1st of every month.



# देवी नवरात्र्युत्सवप्रारम्भः

**22.09.2025**